श्रीः

श्रीमते रामानुजाय नमः

श्रीमते निगमान्तमहादेशिकाय नमः

श्रीगुरुपवनपुराधीशाय श्रीकृष्णाय परब्रह्मणे नमः

श्री मेल्पत्तूर् नारायणभट्टतिरेः कृतिषु

# ॥ श्रीमन्नारायणीये एकोनशततमं दशकम् ॥

*This document has been prepared by*

*Sunder Kidāmbi*

*with the blessings of*

श्री रङ्गरामानुज महादेशिकन्

*His Holiness  śrīmad āṇḍavan śrīraṅgam*

श्रीः

श्रीमते रामानुजाय नमः

श्रीमते निगमान्तमहादेशिकाय नमः

# ॥ श्रीमन्नारायणीये एकोनशततमं दशकम् ॥

## भगवन्माहात्म्यानुवर्णनम्

विष्णोर्वीर्याणि को वा कथयतु धरणेः कश्च रेणुन्मिमीते
    यस्यैवाङ्घ्रित्रयेण त्रिजगदभिमितं मोदते पूर्णसम्पत्।
योऽसौ विश्वानि धत्ते प्रियमिह परमं धाम तस्याभियायां
    त्वद्भक्ता यत्र माद्यन्त्यमृतरसमरन्दस्य यत्र प्रवाहः ॥ **99.1** ॥

आद्यायाशेषकर्त्रे प्रतिनिमिषनवीनाय भर्त्रे विभूते -
    र्भक्तात्मा विष्णवे यः प्रदिशति हविरादीनि यज्ञार्चनादौ।
कृष्णाद्यं जन्म यो वा महदिह महतो वर्णयेत्सोऽयमेव
    प्रीतः पूर्णो यशोभिस्त्वरितमभिसरेत् प्राप्यमन्ते पदं ते ॥ **99.2** ॥

हे स्तोतारः कवीन्द्रास्तमिह खलु यथा चेतयध्वे तथैव
    व्यक्तं वेदस्य सारं प्रणुवत जननोपात्तलीलाकथाभिः।
जानन्तश्चास्य नामान्यखिलसुखकराणीति सङ्कीर्तयध्वं
    हे विष्णो कीर्तनाद्यैस्तव खलु महतस्तत्त्वबोधं भजेयम् ॥ **99.3** ॥

विष्णोः कर्माणि सम्पश्यत मनसि सदा यैः स धर्मानबध्ना -
    द्यानीन्द्रस्यैष भृत्यः प्रियसख इव च व्यातनोत् क्षेमकारी।
वीक्षन्ते योगसिद्धाः परपदमनिशं यस्य सम्यक् प्रकाशं
    विप्रेन्द्रा जागरूकाः कृतबहुनुतयो यच्च निर्भासयन्ते ॥ **99.4** ॥

नो जातो जायमानोऽपि च समधिगतस्त्वन्महिम्नोऽवसानं
    देव श्रेयांसि विद्वान् प्रतिमुहुरपि ते नाम शंसामि विष्णो।

तं त्वां संस्तौमि नानाविधनुतिवचनैरस्य लोकत्रयस्या -
 प्यूर्ध्वं विभ्राजमाने विरचितवसतिं तत्र वैकुण्ठलोके ॥ 99.5 ॥

आपः सृष्ट्यादिजन्याः प्रथममयि विभो गर्भदेशे दधुस्त्वां
 यत्र त्वय्येव जीवा जलशयन हरे सङ्गता ऐक्यमापन्।
तस्याजस्य प्रभो ते विनिहितमभवत् पद्ममेकं हि नाभौ
 दिक्पत्रं यत् किलाहुः कनकधरणिभृत् कर्णिकं लोकरूपम् ॥ 99.6 ॥

हे लोका विष्णुरेतद्भुवनमजनयत्तन्न जानीथ यूयं
 युष्माकं ह्यन्तरस्थं किमपि तदपरं विद्यते विष्णुरूपम्।
नीहारप्रख्यमायापरिवृतमनसो मोहिता नामरूपैः
 प्राणप्रीत्यैकतृप्ताश्चरथ मखपरा हन्त नेच्छा मुकुन्दे ॥ 99.7 ॥

मूर्ध्नामक्ष्णां पदानां वहसि खलु सहस्राणि सम्पूर्य विश्वं
 तत्प्रोत्क्रम्यापि तिष्ठन् परिमितविवरे भासि चित्तान्तरेऽपि।
भूतं भव्यं च सर्वं परपुरुष भवान् किञ्च देहेन्द्रियादि -
 ष्वाविष्टोऽप्युद्गतत्वादमृतसुखरसं चानुभुङ्क्षे त्वमेव ॥ 99.8 ॥

यत्तु त्रैलोक्यरूपं दधदपि च ततो निर्गतोनन्तशुद्ध -
 ज्ञानात्मा वर्तसे त्वं तव खलु महिमा सोऽपि तावान् किमन्यत्।
स्तोकस्ते भाग एवाखिलभुवनतया दृश्यते त्र्यंशकल्पं
 भूयिष्ठं सान्द्रमोदात्मकमुपरि ततो भाति तस्मै नमस्ते ॥ 99.9 ॥

अव्यक्तं ते स्वरूपं दुरधिगमतमं तत्तु शुद्धैकसत्त्वं
 व्यक्तं चाप्येतदेव स्फुटममृतरसाम्भोधिकल्लोलतुल्यम्।
सर्वोत्कृष्टामभीष्टां तदिह गुणरसेनैव चित्तं हरन्तीं
 मूर्तिं ते संश्रयेऽहं पवनपुरपते पाहि मां कृष्ण रोगात् ॥ 99.10 ॥

॥ इति श्रीमन्नारायणीये एकोनशततमं दशकं समाप्तम् ॥